BHARATI INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY RESEARCH & DEVELOPMENT (BIJMRD)

(Open Access Peer-Reviewed International Journal)

DOI Link : https://doi.org/10.70798/Bijmrd/04020030

Available Online: www.bijmrd.com | BIJMRD Volume: 4 | Issue: 02 | February 2026 | e-ISSN: 2584-1890

संस्कृतकथासाहित्यस्य महत्वमम्

Puja Gole

Research Scholar, Department of Sanskrit, Ranchi University
Email: pujagole7a@gmail.com

प्रवन्धसारः-

समुद्रमिव सुविस्तृतं संस्कृतसाहित्यम्। तस्य आस्वादे स्वर्गास्वादमिव आनन्दं प्राप्नोति।भूखण्डे आनन्दप्राप्तिः अस्य जीवनस्य मूललक्ष्यम् । अस्मिन् साहित्ये विभिन्नाः विभागाः वर्तन्ते। तेषु संस्कृतकथासाहित्यं एकं प्रधानं भागम् ।विभागोऽयं न केवलं संस्कृतसाहित्ये अपि तु संस्कृतेतरे अप्युलभ्यते।भारते संस्कृतकथाकाव्यं आ वालात् सर्वान् जनान् प्रति नीतिशिक्षाप्रदानं कर्तुं शक्यते। संस्कृतसाहित्ये सर्वैः कविभिः स्वग्रन्थे कथायाः वहुधा चर्चा कृता। परन्तु तत्र मतविरोधमपि दृश्यते।मानवाः कल्पनामाश्रित्य कथाः रचयन्ति।वास्तवता अपेक्षया कल्पनाधिका रमणीया। लोककथायाः श्रवणप्रवृत्या कथासाहित्यस्य उत्पत्तिः भवति। जनानां अतृप्तकामनां पूरयितुं कथासाहित्यस्य उत्पन्नः जातः। संस्कृतकथासाहित्यस्य उल्लेखः वैदिक ब्राह्मणेषु उपनिषत्सु च प्राप्यते। रामायणमहाभारतेऽपि सहस्राः कथाः सन्ति। परन्तु केवलं कथाभिः नीत्वा पृथक् रूपे साहित्यं लिख्यते।कथासाहित्यं त्रिधा विभक्तुं शक्यते। यथा -

१. जनानां आधारेण रचिता कथा।

२. पशुविहगाणां आधारेण रचिता कथा।

३. लोककथा।

कथासाहित्यस्य लेखनस्य अन्तराले मूलतः त्रीणि कारणानि आसन्। तानि यथा –

- १. अवकाशजीवनम् २. मनसः मनोरञ्जनम् ३. नीतिशिक्षा।

लघुबालानां नैतिकशिक्षाप्रदानस्य उद्देश्ये विभिन्नैः विद्वद्भिः मानवानां पशुनां वा विषयं नीत्वा भिन्नाः कथाः कथिताः।

कथा हि भारतीय सभ्यतायाः समृद्धिः। तदभावे च साहित्यस्य विनाशो अभवत्। किन्तु तन्न भवेत् अस्मिन् भारते। यतोहि भारते कथायाः भाण्डारः वर्तते। यतोहि मानवाः कथाप्रेम्निनः। कथा न केवलं बालानां कृते अपि तु समाजे सर्वेषां जनानां कृतेऽपि आदरणीयाः। शैशवे माता स्नेहेन बालानां क्रोड़े नीत्वा निद्रायाः कृते कथाः अश्रावयत्। तस्मादेवास्माकं मनसि स्वाभाविकतया कथा श्रवणस्यैकान्तिकी वासना सुप्तरूपेण च जागरिता भवति।तदा गुरूजनाः पक्षिपशुराजस्य काल्पनिककहानी रसं संमिश्य अस्माकं समीपे परिवेशयन्ति।गम्भीरविषयस्य बोधयितुं सारल्येनोपस्थापयितुं चास्माभिरुपाख्यानान्यश्रुयन्ते। रामायणमहाभारतस्य अनन्तरं संस्कृतसाहित्ये कथासाहित्यस्य प्रकाशः प्राप्तः। पञ्चतन्त्रवृहत्कथावृहत्त्रयीहितोपदेशादि ग्रन्थानां विरचनस्योद्देश्यम् अल्पमतीबालानां नीतिशिक्षाप्रदानेन वुद्धेर्विकाशसाधनम् । अस्मिन् अवान्तरप्रयोजनाय कथासाहित्यस्य

विकाश यथायथरूपेण आरभ्यते।मनोविनोदनमेव कथायाः मूलमुद्देश्यम्।भारते प्रायशः सर्वस्मिन् साहित्ये प्राचुर्येण कथाप्रपञ्चमस्ति।

मुख्यशब्दाः- *संस्कृतभाषा, संस्कृतकथासाहित्य, कथा, आख्यायिका,आख्यानः,संस्कृतलोककथा, कल्पना, सरसवस्तु,काहिनी, सरलसंस्कृतकथा, शैक्षिकतत्त्वानि, भारतीयसंस्कृतिः, नीतिकथायाः, पञ्चतन्त्रम्, हितोपदेशः, वृहत्कथादि।*

प्रस्तावना -

लोककथा जगति सर्वेषां कथासाहित्यानां जनकः अस्ति[१]। एतासां कथानां जन्मः तस्मिन् काले अभवत् यदा मनुष्याः कथा-इतिहासयोः मध्ये भेदः कर्तुं न शक्नुवन्ति।लोककथायाः मूलोत्पत्तिः कस्मिंश्चित् स्थाने काले वा विशेषे न गणयितुं शक्यते।यदा मनुष्याः स्वस्य अनुभवान् प्रकटयन्ति, तदा लोककथायाः जन्मः अभवत्। परन्तु मौखिकपरम्परायाः विश्वे प्रसृता। यद्यपि पाश्चात्यविद्वांसः मते भारतं हि लोककथायाः प्रथमजन्मभूमिं मन्यन्ते। परन्तु कल्पना, विश्वासः व्यवहाराः च यत्र तत्र सर्वत्र समानरूपेण वर्तन्ते।मूललोककथायाः एकमेव उत्पत्तिकेन्द्रं न भवितुमर्हति।मानवसमाजस्य एताः मूलभूतप्रवृत्तयः सक्रियरूपेण अभवन्, तेषां उत्पत्तिः अपि स्वाभाविकतया एव अभवत्।लोककथायाः प्रथमं उत्पत्तिः भारते अभवत् इति वयं कल्पयितुं शक्नुमः[२]। कथायाः वाचिकरूपं सृष्टेः आरम्भादेव प्रत्येकस्मिन् देशे प्राप्यते। एषा पारम्परिककथा सर्वेषु देशेषु तृणवत् स्वयमेव वर्धितास्ति[३]।

लोककथायाः मूलस्रोतस्य आविष्कारार्थं वैदिकसंहितानाम् अनुसरणमावश्यकम् । प्रारम्भे लोककथा मौखिकपरम्परायामासीत् । यद्यपि मूलतः कस्यचित् व्यक्तिविशेषस्य सृष्टिः आसीत्। परन्तु प्रारम्भमात्रे लोकप्रियं लोकप्रेरितं च भूत्वा जनानां सृष्टिः भवति। ऋग्वेदे ऋषेः शुनःशेपस्य प्रसिद्धमाख्यानम्(१.२४.३०),अपालात्रेय्याः कथा(८.९.१),च्यवन-सुकन्यायाः कथा(१०.३९.४),यम-यमी कथा(१०.१०), पुरूरवा-उर्वशी(१०.९५), सरमा-पणि(१०.१०८), विश्वामित्र-नदी(३.३३) आदि संवादसूक्तेषु लोककथायाः प्राचुर्यमस्ति। ऋग्वेदे लौकिकसुखानामधिकं प्रसारमस्ति।अर्थववेदे लौकिकतत्वानां प्रादुर्भावस्य अवसरः प्राप्तः यजुर्वेदे कर्मकाण्डस्य विषयः प्राप्यते। तस्य अन्तिमलक्ष्य पारलौकिकसुखमासीत् । परन्तु अर्थववेदे लोकजीवनेन सह सम्वन्धः।तत्र जनानां विश्वासः,जादु धर्मः, संस्कारः इत्यादयः स्थानं प्राप्नुवन्ति। एकत्र वैदिकसाहित्येन तत्कालीनसमाजस्य सभ्यतायाः च परिचयः दत्तः। अपरन्तु तेषां माध्यमेन वयं तत्कालीन जनैः सह अपि परिचयं प्राप्नुमः। ब्राह्मणग्रन्थेऽपि अनेकाः कथाः संगृहिताः सन्ति। शतपथब्राह्मणेपुरूरवा-उर्वशीकथा (११.५.१), ताण्डवब्राह्मणे च्यवन-सुकन्यायाः कथा (१४.६.११), ऐतरेयब्राह्मणे शुनःशेपकथा (७.३) शांख्यायनब्राह्मणे महर्षेर्वृहस्यकथ (५.२) आदि आख्यानानि तत्कालीनजनेषु प्रचलिताः मौखिककथाः भवितुमर्हन्ति। उपनिषदि अपि विभिन्नाः कथाः वर्तन्ते। यथा कठोपनिषदि यम-नचिकेताकथा, बृहदारण्यकोपनिषदि याज्ञवल्क्य-गार्गीकथा (३.६), केनोपनिषदि अग्नि-यक्षकथा, छान्दोग्योपनिषदि सत्यकामजावालकथा (४.५.९.१) एवं श्वान-कथा (१.१२.१-४)[४] आदि।जनानां मौखिकपरम्पारायां प्रचलतिः आख्यान-गाथा-स्तुति आदि प्राचीनभारते विद्यते ।

उद्देशम्

जनाः सामाजिकजीवाः।वाल्यावस्थातः एव नैतिकमूल्ययुक्तया शिक्षया विशिष्टसामाजिकसांस्कृतिकसन्दर्भेण च तेषां सम्बन्धः वर्धते। वैज्ञानिकदृष्टिकोण-समानता-सामाजिकता-सहनशीलता-वन्धुत्वभावना-स्वकर्तव्यपालन-स्वतन्त्रता-प्रजातन्त्रता आदीनां मूल्यानां प्रत्येकस्मिन् स्तरे अनवरतमावश्यकता पश्यति।

राजशासनपद्धत्याः सम्यक् ज्ञानं कौटिल्येन रचितम् अर्थशास्त्रस्य अध्ययनेन वर्धते। अत्र राजनीतिक्रियाकलापानां वर्णनात्मिका आलोचना विहिता। तदनन्तरम् अस्यामेव भाषायां नैतिककथासाहित्ये पञ्चतन्त्रम्, हितोपदेशः, कथासरित्सागरम् इत्यादीनि कथासाहित्यानि प्राप्यन्ते।अद्यतन सर्वस्मिन् समाजे सर्वासु दिक्षु नैतिक-सामाजिक-शैक्षिक-सांस्कृतिक आध्यात्मिकमूल्यानां क्षयः अवलोक्यते। अस्य दुर्प्रभावः शिक्षाक्षेत्रेऽपि दृश्यते। अतः शैक्षिक आयोगः पाठक्रमस्य पाठ्यचर्चायां च मूल्यसंवर्धनपराः कथाः बालानां सुखाय,हितोपदेशाय च प्राचीनसंस्कृतिवोधकाः कथाः योजयितुं शिक्षाविदः प्रेरयन्ति।

भारतीयज्ञानपरम्परायां कथासाहित्यस्य उत्पत्तिः प्राचीनसंस्कृतसाहित्यादेव अभवत्। गद्यकाव्यस्यद्वयोः भेदयोः मध्ये एकः महत्वपूर्णं भेदः कथा ।प्रसङ्गवशात् अग्निपुराणे गद्यकाव्यस्य पञ्चभेदाः उद्दिष्टाः।ते यथा -

आख्यायिका कथा खण्डकथा परिकथा तथा।

कथानिकेति मन्यते गद्यकाव्यं च पञ्चधा।।[५]

संस्कृतसाहित्ये कथासाहित्यम् अतीव महत्वपूर्णं जनप्रियं च वर्तते।विश्वज्ञानपरम्परायां गद्यकाव्यस्य रूपद्वयं दृश्यत।ते यथा - कथा आख्यायिका च। साहित्यदर्पणकारः विश्वनाथकविराजः महोदयः अपि एतत् विभागं स्वीकृतवान्। कथायाः कृते सः उक्तवान्-

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।

क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके।

आदौपद्यैर्नमस्कारःखलादेर्वृत्तकीर्तनम्।।[६]

प्रायः सर्वैः आचार्यैः गद्यकाव्यस्य विभागद्वयं स्वीक्रियते। परन्तु आचार्यदण्डीमहोदयः एतत् विभागं न स्वीकृतवान्। तस्य मते कथायाः किमपि सुनिश्चितं विभागं नास्ति। आख्यायिका मूलतः सत्यघटनायाः कृते अर्थात् ऐतिहासिक घटनायाः कृते प्रयुज्यते। परन्तु कथा काल्पनिकघटनायाः कृते उपयुज्यते। गद्यकाव्यस्य कथया सह कथासाहित्यस्य किञ्चित् भेदः वर्तते। कथां प्रति जनानां रुचिः जन्मतः दृश्यते।वाल्यकालात् कथायाः कृते जनस्य रुचिः क्रमेण संवर्धते।पुरातनकाले कथायाः मूलमुद्दिश्यं मनोरञ्जनेन सह समाजे नैतिकशिक्षायाः आचारशिक्षायाः एव च संवर्धम् । परन्तु वर्तमानकाले कथासाहित्यं केवलं वैज्ञानिक दृष्ट्वा वर्धन्ते।

वर्तमानकाले कथासाहित्यस्य स्वरूपमधिकं विस्तृतं जातम्। कथायाः तरङ्गाः वहुप्रकारैः प्रवाहिताः। यथा सामाजिक-राजनैतिक-दार्शनिक-नैतिक रोमाञ्चदयः। वर्तमानकाले कथायाः यावत् प्रचारः वर्धते तावत् अन्यस्य कस्यापि साहित्यस्य न दृश्यते।

कथा एकं अल्पवृत्तं भवति, यस्य पठनाय स्वल्पं समयस्य प्रयोजनम् । कथायाः अल्पपाठेन घटनायाः विस्तृतकाहिनी ज्ञातुं शक्यते। कथासाहित्ये कथानकं, चरित्रचित्रणम्,कथोपकथनम् , भाषाशैली, विभिन्नतत्त्वानि, शीर्षकम् एवञ्च उद्देश्यादि संस्कृतकथाः उच्चस्थानं प्राप्नुवन्ति। एतासां कथानां क्रमवद्धमानेन जीवनोपयोगि परिस्थितिभिश्च सह सम्बन्धितमस्ति। कथासु आदर्शभाषायाः प्रयोगः कृतः। संस्कृतभाषायां अतीवा सहजा सुग्राह्या च कथा वर्तते। एताः कथाः जटिलभावनां कृते सहायिकाः भवन्ति।कथासाहित्यस्य माध्यमेन सांसारिकज्ञानस्य प्रयोगः वर्धते।कथामाध्यमेन कल्पनाशक्तेः वृद्धिर्भवति।

नीति-कथासाहित्यम्

संस्कृतसाहित्ये काचन कथा व्यख्यातःया जन्मजातानां शिशूनां सामान्यजनानां वा नैतिकशिक्षाप्रदानाय विकसिताः सन्ति।ता कथा नीतिकथा इति उच्यते। एतासु कथासु प्रायशः जन्तुसम्वन्धाः कथाः विद्यमानाः।यया मानवस्य नैतिकोपदेशग्रहणे सहजलभ्यः भवति।यदि पशु-पक्षि-जन्तवः तादृशी वुद्धिमत्तां स्थापितुं शक्नुवन्ति तर्हि मानवाः अपि ताभ्यः कथाभ्यः शिक्षाग्रहीतुं शक्नुवन्ति। यतोहि एतासु कथासु पशु-पक्षि-जन्तूनां अधिकया प्राधान्यं दृश्यते तर्हि एतायाः नाम पशुकथाः इति नाम्ना कथ्यन्ते। अत्र सर्वासु कथासु साहसिकता-लोभः-छल-पटुता-प्रेम-प्रपञ्च-विश्वासघात-स्वामीभक्ति-सज्जननिन्दा-कपटता-चञ्चलता-धर्म-नीति-सदाचार-दुर्व्यवहार-उत्साहवर्धकानां कार्याणां च विस्ता रेण वर्णनं प्राप्नोति।यया मनोरञ्जनेन सह सद्व्यवहारस्य नैतिकव्यवहारस्य च शिक्षां मानवाः प्राप्नुवन्ति। एताः कथाः सरलसंस्कृतभाषया लिखिताः। फलतः संस्कृतभाषां अधिगन्तारः जनाः स्वभाषया सारल्येण नीतिकथायाः विस्ताररूपं प्रदानाय अवसरं प्राप्नुवन्ति।

वस्तुतः एतासु कथासु मानवः सज्जनः व्यक्तिः भवेत्।एतायाः कथायाः मूलमुद्दिश्यं नैतिकशिक्षया उपदेशं प्रदानं। अपरं तु तया सह आनुषङ्गिगकानि अपि वहूनि उपदेशानि भवन्ति। अत्र कर्तव्याकर्तव्योः विचारः, धर्मस्य विचारः,विवेकवुद्धेः जागरणं च भवति। वस्तुतस्तु लौकिकव्यवहारे पटुताप्रदानेन सह जनेषु आदर्शवादस्य प्रकाशं नीतिकथायाः लक्ष्यं भवति। अत्र नीतिकथा

गद्यपद्ययोः उभयोः सम्बन्धिता भवति। एवं च सरसशैल्यां विरचिता रोचकता परिपूर्णा च भवति।नीतिकथाकारः स्वग्रन्थस्य उपयोगितायाः विषये एवमुक्तवान्-

श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु।

वाचा सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ।।[७]

कथाशब्दस्यार्थः-

कथ्यते इति कथा इति अर्थे कथाशब्दः उत्पद्यते । √कथ् इति धातुना सह 'चितिपूजिकथिकुम्बिचर्चश्च'[८]इति सूत्रे अङि प्रत्ययः कृत्वा स्त्रिविवक्षाहेतु अजाद्यतष्टाप्[९] इति सूत्रेण टाप् प्रत्यय योजयित्वा कथाशब्दः निष्पद्यते। बङ्गभाषायां कथाशब्दः निश्चितरूपे छोटोगल्पार्थे प्रयोगः दृश्यते । अत्र वक्ता श्रोता च उभयोः उपस्थितिः आवश्यकः । आङ्ग्लभाषायां गल्पकथा लघुकथा वा Fiction इति नाम्नाभिहितम् । तामिल-तेलेगु-कन्नड-फारसी-उर्दू-आरबि-हिन्दीसाहित्येऽपि कथेयं विद्वद्भिः रचिता । आधुनिकसंस्कृतसाहित्येऽपि कथायाः वहुशः प्रयोगः दृश्यते । अस्मिन् साहित्ये लघु-टुप्-पुट-पत्र-त्रासद-ललित-स्पर्श-व्यङ्ग-विनोदकथानां प्रचलन दृश्यते । समस्ते वैदिकसाहित्ये कथाशब्दः प्रथमे ऐतरेयब्राह्मणे प्राप्नोति । सर्वप्रथममेव कथाशब्दस्य कृते 'आख्यानार्थं' प्रयुज्यते । मनुः अपि रचनार्थे मनुसंहितायां कथाशब्दस्य प्रयोगः कृतः यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यामत्सरः ब्राह्मणोद्याश्च कथाः कुर्यात् पितृणामेतदीप्सितम्'[१०] इति । रामायणग्रन्थेऽपि विभिन्ना कथा प्राप्यते।ते यथा - 'सनत्कुमारो भगवान् पुरा कथितवान् कथाम् । भविष्यं विदुषां मध्ये तव पुत्रसमुद्भवम्[११] इति । एतत् वाक्यस्य रघुवंशे व्यवहारोऽस्ति- 'अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु'[१२]इति । अभिज्ञानशाकुन्तलम् ग्रन्थेऽपि- का कथा वाणसन्धाने ज्याशब्देनैव दूरतः[१३] । पुनरपि कथां प्रमत्तः प्रथमं कृतामिव"[१४]इति । अमरकोषेऽपि कथायाः विषये 'आख्यायिकोपलब्धार्था प्रवन्ध कल्पना कथाइति उक्तिः प्राप्यते । शब्दकल्पद्रुमात् उद्धृत्यः कोहलाचार्यस्य मतं-'प्रवन्धकल्पनां स्तोकसत्या प्राज्ञाः कथां विन्दुः । परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित्[१५] इति । हलायुधस्य मते कथाशब्दस्य अर्थः चत्वारः - क. प्रवन्धकल्पना ख. स्वयंरचना ग. वार्ता घ. विवरणमिति च ।

अग्निपुराणे कथाविषये इयं संज्ञा विद्यते -

श्लोकैः स्ववंशं संक्षेपात् कविर्यत्र प्रशंसति।

मुख्यस्यार्थावताराय भवेद् यत्र कथान्तरम्।।

पदच्छेदो न यत्र स्याद् भवेद् वा लम्बकैः क्वचित्।सा कथा।[१६]

अर्थात् यत्र कविभिः कतिचित् श्लोकान् नीत्वा संक्षेपेण स्ववंशवृतान्तं प्रकाश्यते ।यत्र काहानिव्याख्याविषये कथान्तरं वर्णितम्। कथायाः परिच्छेदविभागो न प्राप्यते, परन्तु कुत्रचित् लम्भशब्देन ग्रन्थविभाजनपद्धतिः दृश्यते सा एव कथा।

रूद्रटाचार्य कृत काव्यालंकारनामकग्रन्थे कथायाः संज्ञा एवं प्राप्ता। तत्रास्ति -

श्लोकैर्महाकथायमिष्टान् देवान् गुरून् नमस्कृत्य।

संक्षेपेण निजं कुलमभिदध्यात् स्वं च कर्तृतया ।।

सानुप्रासेन ततो भूयो लघ्वक्षरेण गद्येन।

रचेयेत् कथाशरीरं पूरेव पूरवर्णकप्रभृतीन्।।

आदौ कथान्तरं वा तस्यां न्यस्येय प्रपञ्चितंसम्यक्।

लघुतावत्सन्धानं प्रक्रान्तकथावताराय।।

कन्यालाभफलां वा सम्यग्विन्यस्तसकलशृंगाराम्।

इति संस्कृतेन कुर्यात्कथामगद्येन चान्येन।।[१७]

अर्थात् कथायाः प्रारम्भे देवगुरुवन्दना कविः परिचितः, अनुप्रासयुक्तविषयस्य उपस्थानम्, कथायाः कन्यालाभादिविषयस्य वर्णना भवेत्। इयं कथा संस्कृतभाषायां गद्येन प्रयोगः क्रियते। किन्तु प्राकृतस्य कृते पद्येन प्रयुज्यते।

आचार्यभामहः तस्य काव्यालंकारे कथाविषये एतत् कथितवान् -

न वक्त्रापरवक्त्राभ्यां युक्तानोच्छ्वासवत्यपि ।

संस्कृतं संस्कृताचेष्टा कथापभ्रंशभाक् तथा।।

अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते।

स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः।।

अनिवद्धं पुनर्गाथाश्लोकमात्रादि तत् पुनः।

युक्तवक्त्रस्वभावोक्त्या सर्वमेवैतादिष्यते।।[१८]

अर्थात् कथाकाव्ये पद्यमाध्यमेन गुरोः देवतायाः च नमस्कारः, प्रशंसा, स्तुतिः,स्थापनीयः । अस्मिन् क्षेत्रे कवेः वंशवर्णनादि करणीयाः।वक्त्रापवक्त्रछन्दमाध्यमेन ग्रन्थिकश्लोको न स्यात्। कथायाः उच्छ्वासलम्भादि विभागो न करणीयः।संस्कृतं एवं च संस्कृतेतरं भाषया कथाकाव्यम् भवितुमर्हति। अत्र नायकं विना अन्यः पात्रः वक्ता भवितुमर्हति।इत्यादिनि वैशिष्ट्यानि कथाकाव्ये प्राप्यन्ते।

संस्कृतभाषायां या लघुकथा वङ्गभाषायां सा छोटोगल्प नाम्ना परिचित। अमेरिकायाः पण्डितः एड्गर-एलानः 'The Philosophy of Composition'इति प्रवन्धे वर्णितम् -A short story should be read in one sitting,anywhere from a half hour to two hours.In contemporary fiction,a short story can range from 1000 to 2000 words.Because of the shorter length,a short story usually focuses on one plot, one main character (with a few additional minor characters), and one central theme.Whereas a novel can tackle multiple plots and themes, with a variety of prominent characters.Short story also lend themselves more to experimentation- that is using uncommon prose styles or literary devices to tell the story.Such uncommon styles or devices might get tedious and downright annoying, in a novel, but they may work well in a short story.[१९]

छोटोगल्पस्य संज्ञाविषये एइच.जि.आयेलस् महोदयः उक्तवान् -A short story is or should be a simple thing, it aims at producing one single vivid effort:it has to seize the attention at the outset, and never relaxing, gather,it together more and more until the climax is reached.The limits of human capacity to attend closely therefore set a limit to it .it must epode and finished before interruption occurs or fatigue sets inइति।[२०]

पुनरपि आयानरीडमहोदयेन मते'Problem of definition इति आलोचनावसरेकथासंज्ञाएवंदत्ता- In current usage short story is generally applied to almost any kind of fictitious prose narrative briefer than a nove'इति।[२१] वङ्गसाहित्ये साहित्यसमालोचकः शीतलं चौधुरीमहोदयः सुष्टुतया छोटोगल्पस्य शैल्याः निरूपितवान् – ছোটোগল্পের আকৃতি যেমন ছোট হবে, তার সঙ্গে গল্প ব্যাপারটিকেও অঙ্গাঙ্গিভাবে যুক্ত হতে হবে। স্বল্প পরিসরে যথেষ্ট নাটকীয় মুহূর্ত সৃষ্টির মাধ্যমে জীবনে কোনো একটি ঘটনা বা বাঁককে যথাযথভাবে তুলে ধরতে হবে। ছোটোগল্পের গতিও হবে দ্রুতগামী। মনে রাখতে হবে নাটকীয় মুহূর্ত সৃষ্টি না হলে ছোটোগল্পের গতি কখনও দ্রুতগামী হওয়া সম্ভব নয়, এর অভাবে গতি ধীর হয়ে যাবে ইতি।[२२] हिन्दीसाहित्येऽपि कविः प्रेमचन्द्रः कथायाः नामान्तर काहिनी इति उक्तवान्। तस्य मते -'कहानी वह ध्रुपद की तान् है।जिसमें गायकः महाफिल शुरु होते की अपनी संपूर्ण प्रतिभा दिखा दिता है।एकक्षण मे चित्त को इतने माधुर्य से परिपूर्ण कर देता है।जितना शतभर गाना सुनने से भी नहीं ही सकता ' इति।[२३]

कथासाहित्यस्य विवर्तनम् -

कथासाहित्यम् संस्कृतसाहित्ये सुप्राचीन प्रथागतसाहित्यम्। अत्र जनमनसि नूतनत्वम्,रमणीया सृजनशीलता इत्यादयः धारणास्ति। अस्य प्रधानं कारणं कथासाहित्यम्।वेदाद् ध्रुपदिसाहित्यमतिक्रम्य वर्तमानसमाजे अपि अधिका रचना प्रथागतसीमा न लङ्घिता। अत्र विविधाकथानां वीजं वेदे निहितमस्ति। विभिन्ना यज्ञसम्वन्धिना कथा,वीरव्यञ्जकत्वं कहानी, विभिन्नाख्यानोपाख्यानस्य आधारः भवति वैदिकधर्मः। यथा वेदे उमाहेमवति कथा , याज्ञवल्क्यमैत्रेयी कथा,शुनःशेप कथा, यम-नचिकेता कथेत्यादि।

परवर्तिकाले लोककथामवलम्व्य संस्कृतकथासाहित्ये वहुधाः प्रसिद्धाः कथाः प्राप्नुवन्ति।ते यथा -गुणाढ्यविरचितो वृहत्कथा, तस्याः अनुकरणे रचिता विभिन्नाः कथाः यथा-वुद्धस्वामिनः वृहत्कथाश्लोकसंग्रहः,क्षेमेन्द्रेण विरचित वृहत्कथामञ्जरीसोमदेवेन रचितः कथासरित्सागरः। अपि च विष्णुशर्मणा कृतः पञ्चतन्त्रः,नारायणशर्माकृतः हितोपदेशः, चिन्तामणिभट्टकृतः शुकसप्ततिकथा,शिवदासेन रचित वेतालपञ्चविंशतिः।जैनकविः क्षेमङ्करेण विरचिता सिंहासनद्वात्रिंशिकाआदि अन्यतमाः कथाः संस्कृतसाहित्ये प्राप्यन्ते। तस्मात् एका सुनिर्दिष्टा धारा कथासाहित्यस्य विकाशे सहायता करोति।

वृहत्कथा –

प्राचीनकालात् मौखिकपरम्परायाः माध्यमेन कथा अश्रुयत।गुणाढ्यः पैशाचीप्राकृते एतादृशी कथा संगृहीता। पैशाची मागधी च निम्नजातीनाम् कृते प्रचलितः। सम्भवतः गुणाढ्यः लोकसमाजे प्रचलिताः कथाः रचयितुं किन्नर-गन्धवयोः योनिविषये कल्पना कथा निर्मितवान्।तत्कालीन केषुचित् जातिषु प्रचलितं कथा यत् वृहत्तरकथारूपेण संकलितः। तस्मिन् रूपेण जनानां मध्ये प्रचलितं आसीत्। जनानां जीवनं अपि तथैव अनेकैः समस्याभिः दुःखैः च पीडितः भवति। अतः तेषां मनोरञ्जनाय परीकथा,रूपकथा वा जनानां मध्ये लोकप्रियं अभवन्। अस्मिन् प्रसङ्गे हजारीप्रसाद द्विवेदी महोदयस्य मते सम्भवतः गुणाढ्यः पण्डितः नगरात् दूरं गत्वा ग्राम्यजनेभ्यः अथवा अरण्यवासीभ्यः कथां श्रुतवान्[२४]।

पण्डितः गुणाढ्यः प्रतिष्ठान नाम्ना कस्यचित् नगरस्य निवासी आसीत्। परन्तु जे.एस.स्पेयरः मते गुणाढ्यः काश्मीरप्रदेशस्य निवासी आसीत्। पुनः पं.वलदेव उपाध्यायानुसारं गुणाढ्यः राजासातवाहनस्य सभाकविः अविध्यत।अमरकविगुणाढ्येण रचिता वृहत्कथा संस्कृतकथासाहित्ये प्राचीनतमसंग्रहः। अस्य ग्रन्थस्य उपरि पराकाष्ठा किमपि ग्रन्थं नास्ति।दुर्भाग्यवशतः वृहत्कथाग्रन्थस्य मूलरूपं न लभ्यते। अतः निश्चयेन वक्तुं न शक्यते वृहत्कथा गद्यरचना पद्यरचना अथवा गद्यपद्यमिश्रितं रचना।

प्राचीनभारतीयसाहित्ये वृहत्कथा अधिकं जनप्रियम् । तस्याः आधारं कृत्वा केचनसंस्कृतनाटकानि काव्यग्रन्थाः च रचिताः सन्ति।अनेकैः संस्कृतकविभिः अपि एतस्याः आदरपूर्वकं उल्लेखः कृतः अस्ति।वृहत्कथायाः कीर्तिः केवलं भारते एव नास्ति।वृहत्तरभारते अपि अस्याः प्रचलनमस्ति।ई.वी षष्ठशताब्देः दक्षिणभारते ताम्रपट्टिकायां उल्लेखः अस्ति। अपि च नवशताब्देः कम्वोडियायां शिलालेखे वृहत्कथायाः उल्लेखः वर्तते । वृहत्कथायाः विषयवस्तुः किम् इति ज्ञातुं तदाधारिताः परवर्तीग्रन्थाः वर्तन्ते।सुवन्धुः तस्य वासवदत्ता नाम्नी कथाग्रन्थे वृहत् कथा विषये वृहत्कथालम्वैरिव सालभञ्जिकानिवहैः उक्तवान्।वाणभट्टोऽपि हर्षचरितग्रन्थे -"

समुद्दीपितकन्दर्पा कृतगौरी प्रसाधना

हरलीलेव नो कस्य विस्मायाय वृहत्कथा ।।[२५]

दण्डी अपि तस्य काव्यादर्शग्रन्थे वृहत्कथाविषये एवमुक्तवान् ।

कथाहि सर्वभाषाभिः संस्कृतेन च वध्यते ।

भूतभाषामयीं प्राहुरद्भुतार्थां वृहत् कथाम्।।[२६]

सम्भवतः अस्मिन् ग्रन्थे वत्सराजः उदयनवासवदत्तयोः पुत्रः नरवाहनदत्तस्य कथा वर्णिता।उदयनस्य पुत्रः नरवाहनदत्तः स्वस्य शत्रुन् पराजय्य विद्याधरराजं अधिकृतवान्। एवं च रमणीयाणां राजकन्यानाम् विवाहः कृतवान्।प्रवलः प्रतिद्वन्ध्वी मानसवेगः अपि तेन हस्ते पराजितवान्।ग्रन्थऽस्मिन् उदयनस्य, वासवदत्तायाः, पद्मावत्याः कथा वर्णितमस्ति।गुणाढ्यः स्ववुद्ध्या अस्मिन् उदयनकथायाः आधारेण वहवाः लोककथाः संयोजितवान् । अस्मिन् वृहत्कथा अवलम्वने अनेकानि काव्यनाटकानि रचितानि।

यथा दण्ड्याः दशकुमारचरितम्,वाणस्य कादम्बरी,धनपालस्य तिलकमञ्जरी,सुवन्धोः वासवदत्ता,सोमदेवस्य यशस्तिलकम् चम्पू,भासस्य स्वप्नवासवदत्तम्,प्रतिज्ञायोगन्धरायण, श्रीहर्षस्य रत्नावली,नागानन्द,प्रियदर्शिका च आदि।

वृहत्कथायाः काहिनी अवलम्वने त्रीणि ग्रन्थाः प्राप्यन्ते।याः वृहत्त्रयी नाम्ना परिचिता। यथा -वुद्धस्वाम्या रचितः वृहत्कथाश्लोकसंग्रहःक्षेमेन्द्रेण रचितः वृहत्कथामञ्जरी,सोमदेवेन विरचितः कथासरित्सागरः, इमानि त्रीणि ग्रन्थानि एकत्रे 'वृहत्त्रयीनाम्ना' परिचिता।

वृहत्कथायाः चत्वारः संस्करणाः संस्कृतभाषायां प्राकृतभाषायां च अनुवादिताः उपलभ्यन्ते।

१. प्राकृतवाचना-संघदासगणि कृत वसुदेवहिण्डी।

२. नेपालीवाचना- वुद्धस्वामीकृत वृहत्कथाश्लोकसंग्रहः।

३. काश्मीरीवाचना- क्षेमेन्द्रकृत वृहत्कथामञ्जरी एवं सोमदेवकृत कथासरित्सागर।

४. तामिलवाचना।

१. प्राकृतवाचना - वसुदेवहिण्डी -

वृहत्कथायाः वसुदेवहिण्डी प्राचीनतमं।मूलग्रन्थे अस्य नाम वसुदेवचरियं(वसुदेवचरितं) इति दृश्यते।वसुदेवहिण्डी' इति नामे 'हिंड्'धातोः प्राकृते प्रयोगः।तथा 'वसुदेवचरियं' इति शब्दे 'चर्' धातोः संस्कृते प्रयोगः। उभयोः धातयोः पर्यायवाची - परिभ्रमणं,विचरणं।'वसुदेवहिण्डी' शब्दस्य अर्थः वसुदेवस्य परिभ्मणं। श्रीकृष्णस्य पिता वसुदेवः यौवनकाले स्वगृहं त्यक्त्वा वर्षाणि यावत् यात्रां कृतवान्। अस्मिन् काले सः अनेकेषां मानवविद्याधरकन्याभिः सह विवाहं कृत्वा अनेके विचित्रानुभवान् प्राप्तवान्। एतत् एव 'वसुदेवहिण्डी' कथायाः मुख्यविषयवस्तुः। ग्रन्थस्य रचनाविधिः पारम्परिकः अस्ति या भारतीयसाहित्ये विशिष्टा। वसुदेवस्य आत्मकथानुसारं मुख्यकथापि लम्भ-लम्भकैः इति भागेन विभक्तः। यया वालिकया सह वसुदेवः विवाहं कृतवान्। तस्याः नामधेयेन लम्भकस्य नामकरणम् अभवत्। यथा श्यामा-विजयालंभक,श्यामली लंभक,गन्धर्वाः लंभक,नीलयशा लंभक आदि।

२. नेपाली वाचनाः वृहत्कथाश्लोकसंग्रहः -

वृहत्कथाश्लोकसंग्रहस्य रचयिता वुद्धस्वामी। नेपालदेशस्य निवासी आसीत्। अस्मिन् ग्रन्थे २८ सर्गाः,४५३९ श्लोकाः च प्राप्यन्ते।ग्रन्थोऽयं वृहत्कथायाः नेपाली वाचना इति कथ्यते। अस्य आकार-प्रकारात् इदं प्रतीयते यत् ग्रन्थोऽयं वृहत्कथायाः मूलकथया सह सम्बन्धं परन्तु अपूर्णमस्ति। नरवाहनदत्तस्य २८विवाहेषु केवलं ६विवाहानां कथा अत्र प्राप्यते। अस्य ग्रन्थस्य विषये विन्तर्निस इदमुक्तम् -भारतीयसाहित्ये अत्यल्पाः एव ग्रन्थाः सन्ति येषु वृहत्कथाश्लोकसंग्रहः इव जीवनस्य प्राधान्यं दत्तमस्ति। मानवजीवनस्य यथार्थता सुन्दरता च न चित्रितं यथा अस्मिन् पुस्तके दृश्यते। साधुः,वेश्या, दलितः,मद्यपानकर्ताइत्यादयः सामान्य पात्राणां जीवनस्य सर्वे पक्षाः अत्र वर्णिताः सन्ति। तदतिरिक्तं धार्मिकोत्सवानां,लोकप्रत्ययानां तेषां संस्कारादि विवरणेन च परिपूर्णमस्ति।

काश्मीरी वाचना : वृहत्कथामंजरी -

वृहत्कथायाः काश्मीरीवाचना क्षेमेन्द्रस्य 'वृहत्कथामञ्जरी' एवं च सोमदेवकृत 'कथासरित्सागर'।उभयः पाठः पूर्वे निर्णीतः।विन्तर्निसस्य अभिमतं क्षेमेन्द्रस्य वृहत्कथामञ्जरी प्राचीनतमं , तत्पश्चात् सोमदेवेन कथासरित्सागरस्य रचना कृतम्।क्षेमेन्द्रः सोमदेवः च उभौ काश्मीरस्य निवासिनौ आस्ताम्।क्षेमेन्द्रः काश्मीरराजा नन्ददेवस्य पार्षदः। तस्य अपरनाम व्यासदासः। वृहत्कथामञ्जरीयां १९ लम्वकानि,७५०० श्लोकाः च सन्ति। केचन विद्वांसः अस्याः प्रथमपञ्चलम्वकाः वृहत्कथायाः अनुवादितरूपं मन्यन्ते।

१. क्षेमेन्द्रः पद्यात्मक सूक्ष्म रूपान्तरणं - रामायणमञ्जरी, भारतमञ्जरी वृहत्कथामञ्जरी, दशावतारचरित,वौद्धावदान, कल्पलता।

२. उपदेशात्मक- चारूचर्याशतकम्,सेव्यसेवकोपदेश,दर्पदलन, चतुर्वर्गसंग्रहकलाविलास,देशोपदेशधर्मशाला।

३.रीतिग्रन्थ- कठिकण्ठाभरण औचित्यविचार-चर्चा,सुवृत्ततिलकं।

४. फुटकल रचनालोकप्रकाशकोषनीतिकल्पतरु,व्यासाष्टक।

वृहत्कथामञ्जरी' इत्यस्य प्रत्येकं लम्भकं वीरस्य विजयेन केनचित् प्राप्त्या वा साक्षात् सम्वन्धी भवति।कथापीठे गुणाढ्याख्यानं वर्णयते। द्वितीयलम्बके उदयनस्तुतिः, तृतीयलम्भके उदयन कर्तृकः पद्मावतीं प्राप्ति कथा, चतुर्थलम्भके विद्याधरराजस्य नरवाहनदत्तस्य जन्म कथा।पञ्चलम्वके विद्याधरपुरे प्रवेशं कृत्वा चतसृभिः कन्याभिः सह विवाहं कथा ।षष्ठलम्भके मानसवेगेन मदनमञ्जुकस्य अपहरणस्य कथानवमे लम्वके ललित्लोचनस्य विवाहस्य एवं च तस्याः अन्तर्धानस्य च कथादशमलम्भके विक्रमादित्यस्य कथा,एकादशलम्वके ललित-लोचनस्य पुनर्पाप्तिः द्वादश्यां मुक्तफलकेतु कथा ,त्रयोदश्यां मदनमञ्जुकस्य प्राप्तिः, चतुर्दशे रत्नप्रभायाः विवाहः, पञ्चदशे अहंकारवती कथा। षोडशे शक्तियशःसप्तदशे वामदेवस्य एवं मंदरदेवस्य कथा,अष्टादशे राजापालकेन सह नायिका अवन्तिवर्मायाः विवाहादि कथा वर्णितः। तथा च अन्तिम अर्थात् नवदशे सम्पूर्णस्य ग्रन्थस्य सारांशरूपेण प्रस्तुतरस्ति।

कथासरित्सागर -

कथासरित्सागरः न केवलं संस्कृतकथासाहित्यस्य महान् ग्रन्थः अपि तु विश्वसाहित्यस्य अपि महान् ग्रन्थरस्ति। ग्रन्थोऽयं काश्मीरराजा अनन्तस्य राज्ञीसूर्यमत्याः मनोरञ्जनाय सोमदेवः संगृहीतवान्।पद्यलिखिते कथासरित्सागरे १८लम्बकाः सन्ति।ये १२४ तरङ्गेषु विभक्ताः सन्ति। ग्रन्थे मूलतः २१६८८श्लोकाः वर्तन्ते। कथासरित्सागरस्य विषये सोमदेवः स्वयं स्पष्टतया उक्तवान् -'वृहत्कथायाः सारस्य संगृहीत्वा रचयाम्यहम्[२७]।मूलकथायां यत् किमपि अस्ति तत् अस्मिन् ग्रन्थे संगृहीतम् । वृहत्कथायाः भाषा प्राकृत परन्तु अस्य संस्कृतमेव। कथासरित्सागरः इत्यत्र कथाः सन्ति पारम्परिकलोकप्रत्ययैः, धार्मिकप्रत्ययैः,रक्तचूषकपशवैः,प्रेममूर्खताभिः सह सम्वन्धाः, बालिकाः एवं तयोः साहसिकाः प्रेमिणः,राजानः नगराः च,राजतन्त्रं,षडयन्त्रम्, माया-जादु-वञ्चना,वध-युद्ध,रक्तचूषपिशाच,यक्ष-भूत-पशु-पक्षी, भिक्षुणां ऋषीणां, मद्यपायीनां, द्यूतकर्तृणां च सत्यानि कल्पितानि च कथाः, अपि च वेश्या, विट्,कुट्टनी च सर्वाः घटनाः अत्र वर्णिताः। एवं प्रकारेण तत्कालीनभारतीयसमाजस्य सम्पूर्णं चित्रणं मिलति। अपि तु विश्वस्य प्रत्येकेऽस्मिन् कोणे प्रसृत्य लोकप्रियः अभवत्। विश्वस्य प्रायः अनेकासु भाषासु अनुदितः एव ।

पञ्चतन्त्र -

संस्कृतकथासाहित्ये प्राचीनतमं लोकप्रियं च कथापुस्तकं पञ्चतन्त्रं। दाक्षिण्यात्ये महिलारोप्यनगरस्य राजा अमरशक्तिः। तस्य त्रयः पुत्राः आसन्।वसुशक्तिः, उग्रशक्तिः, अनेकशक्तिः च। परन्तु ते सर्वे वुद्धिहीनाः,मुर्खाः। विष्णुः शर्मा नाम विद्वान् राज्ञः पुत्राणां कृते नानाविषयानि उपदिश्य पञ्चतन्त्रं रचितवान्। पञ्चतन्त्रस्य अनुवादः विश्वस्य प्रायः ५०भाषासु कृत्वा २५०अधिकेषु संस्करणेषु प्रकाशितः। पञ्चतन्त्रस्य संस्करणं -

१.तन्त्राख्यायिका- पञ्चाख्यानक,क्षुद्राकार,जैनसंस्करण ।

२.उत्तरपश्चिमीसंस्करण- गुणाढ्यस्य वृहत्कथा, वुद्धस्वामीकृत वृहत्कथाश्लोकसंग्रहः, क्षेमेन्द्रेस्य वृहत्कथामञ्जरी, सोमदेवस्य कथासरित्सागर।

३.दक्षिणी संस्करण- दक्षिणी पञ्चतन्त्र,तन्त्राख्यान, हितोपदेश।

४.पह्लवी संस्करण- करटक-दमनक।

पञ्चतन्त्रेउल्लेखितःमुद्रायाःनामदिनारः।पञ्चतन्त्रस्यअनुवादकः-भाषा अनुवादकः नाम ।

१.पञ्चतन्त्रस्य पह्लवी अनुवादः वार्जो करटक-दमनक ।

२.पह्लवीतः सीरीयामनुवाद वुद कलिलग उअ दमनग

३.सीरीयतः आरवी भाषायांआवदाल्लाह इवन अल कलिलह उअदिमनह्

४.आरवीतः हिब्रुराव्वि जोयेलपञ्चतन्त्रस्य पञ्चाध्यायाः सन्ति।ते यथा -

१.मित्रभेदः- मुख्यकथा करटक-दमनक। अस्मिन् कथायां करटक-दमनक नामकौ धूर्तशृगालौ मन्त्रालयं प्राप्तुं पिङ्गलकः नाम सिंहेन संजीवकः नाम वृषभस्य च मध्ये मैत्रीं कृत्वा पश्चात् तं भङ्ग्यं कृत्वा पिङ्गलकेन संजीवकं हतः। अन्ते सञ्जीवकं हत्वा धूर्तः शृगालः मन्त्री अभवत्। अत्र साम-दान-दण्ड-भेदस्य कथाः सन्ति। अस्य तन्त्रस्य अन्याः काश्चन कथाः -काकस्य बुद्धिः, शशकस्य बुद्ध्या सिंहस्य नाशः,जीर्णधनव्यापारिणः कथाः। अस्मिन् वर्गे २२कथाः स्थापिताः।

२.मित्रप्राप्ति- लघुपतनकःनामकाकस्यकथाअत्रवर्णिताचित्रग्रीवकपोतस्य,हिरण्यकमूषिकस्य,मन्थरकच्छपस्य,चित्राङ्गमृगस्य च मैत्रीविषये अपि चर्चास्ति। अपरं कथा - हिरण्यकस्य दुःखम् ।अतिलोभस्य परिणामः। अस्मिन् वर्गे ६कथाः सन्ति।

३.काकोलुकीयम्- अस्य मन्त्रस्य अन्यत् नाम सन्धिविग्रहः। यदा उल्लुकराजः अरिमर्दनः रात्रौ काकान् मारितवान् । तदा काकराजमेघवर्णस्य मन्त्री सत्यजीवी छलेन तेषां दुर्गं प्रविश्य उलूकान् दग्धवान् । तदतिरिक्तं शशः, शृगालः, ब्राह्मणः त्रयः धूर्ताः इत्यादयः अन्याः कथाः। अस्मिन् वर्गे ४ कथाः वर्णिताः ।

४.लब्धप्रणाशः-लब्धप्रणाशशब्दस्य अर्थः हठकारिता। कथायां वानर-ग्राहयोः च प्रथमं मित्रतां कृत्वा ततः मैत्रीं वैरभावे परिणतः भवति। तस्मिन् १६कथाः प्राप्यन्ते।

५.अपरीक्षितकारकं-(हठः/अजेयता/अविचारितकर्म)।श्रेष्ठमणिभद्रस्य पूर्वाजितधनं दृष्ट्वा एकः नाईः प्रमादपूर्वकं कार्यमकरोत् । अनन्तरमत्यन्तं कष्टमप्राप्नोत् । अत्र १५कथाः वर्णिताः।

वेतालपञ्चविंशतिः- वृहत्कथामञ्जरीयां १२२० श्लोकेषु, कथासरित्सागरे च २१९५ श्लोकेषु वेतालपञ्चविंशतिकथा कथ्यते। अत्र वेताल एक अशरीरी आत्मासीत्। पञ्चविंशततिःकथाः संगृहीत्वा संस्कृतकथासाहित्यपरम्परायां पञ्चविंशतिः कथाः अत्यधिकः जनप्रियः। ताः न केवलं भारते अपि तु समग्रे विश्वे। अत्र राजा विक्रमादित्यस्य वधस्य साजिशं कुर्वन् शान्तशिला नामकः एकः तांत्रिकभिक्षुः प्रतिदिनं राजसभां गत्वा गुप्तरतत्नं राज्ञानमुपस्थापयति स्म।रत्नस्य दानस्य कारणं पृच्छन् राजा ज्ञातवान् यत् योगी तान्त्रिकशवसाधनस्य सफलतां प्राप्तुं विक्रमादित्यस्य साहाय्यं अयाचत्। वस्तुतः योगी प्रत्यारणपूर्वकं राजानं यज्ञं कर्तुं अभिप्रायं कृत्वा तस्य वधस्य संकल्पं कृतवान्। भिक्षुकः राज्ञे अप्रार्थयत् वृक्षात् लम्बवत् मृतशरीरम् नीत्वा तस्य समीपे अनयत्। परन्तु राजा यदा मृतशरीरं अनयत् तदा शरीरस्थ वेतालः अप्रकयटत्। वेतालः राजानम् अकथयत् मया एकामेकाम् कथां कथयते। भवान् कथायां समस्यायाः समाधानं करोतु,यदि भवान् समाधानं ज्ञात्वा अपि उत्तरं न दातुं शक्यते। तर्हि सः भग्नवक्षःस्थलेन मरिष्यति। तदन्तरं वेतालः प्रतिदिनं कथां कथयति, समाधानं ज्ञात्वा पुनः वृक्षमारोहति। एवं चतुर्विंशतिः दिनानि व्यतीतानि पञ्चविंशतिः तमे दिने राजा वेतालकथाविषये प्रश्नस्य उत्तरं दातुं न शक्यते। परन्तु वेतालः सन्तुष्टः भूत्वा भिक्षयोगिनः षडयंत्रं राजानं कथितवान्। अनन्तरं वेतालस्य निर्देशानुसारं विक्रमादित्यः योगीनम् मारयित्वा सुखेन स्वराजस्य शासनं प्रारभत।

हितोपदेश-

पञ्चतन्त्रशैल्या लिखितः 'हितोपदेशः' विलक्षणः कथापुस्तकरस्ति । अस्य लेखकः पंडित नारायणः शर्मा यः राजा धबलचन्द्रस्य सभाकविः । पाटलिपुत्रस्य राजा सुदर्शनस्य स्वमुर्खपुत्रान् शिक्षितुं पञ्चतंत्रात् काहिनीं गृहीत्वा पंडित नारायणः शर्मा हितोपदेशं रचितवान् - "पञ्चतन्त्रात्तथान्यस्मात् ग्रन्थादाकृष्य लिख्यते"[२७]। अस्मिन् ग्रन्थे पञ्चतन्त्रात् चतुस्चत्वारिंशत्कथाः गृहीत्वा पञ्चविंशतिःकथासु हितोपदेशं रचितवान्। इदं पुस्तकं नैतिकशिक्षाप्रदानार्थं लिखितमस्ति ।ग्रन्थेऽस्मिन् चत्वारः भागाः सन्ति।ते यथा "मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च"। हितोपदेशे रविवासरं भट्टारकवासरं इति नाम्ना परिचिता। हितोपदेशशब्दस्य अर्थः हिताय उपदेशः। अत्र अष्टादशः मौलिककथाः सन्ति। हितोपदेशावलम्वने रचिता कथा यथा -कल्याणकटके

भैरवव्याधः,चम्पकवती वने मृगकाकशृगालायाः कथा।समुद्रतटे टिट्टिभदम्पती,मुनि-मुषिककथा, नीलवर्ण शृगाल कथा।सुन्द-उपसुन्दकथा,वीरवरकथा,नकुल-कृष्णसर्पकथादि।

शुकसप्ततिकथा –

आधुनिकभारतीयभाषायाम् अनेकविदेशीयभाषासु च अनुवादितः शुकसप्ततिः विश्वसाहित्ये लोकप्रियरस्ति। तस्य उत्पत्तिः रचयिता च विषये किमपि वक्तुम् कठिनम्।विन्तर्निस्त्सः मते 'तस्य मूलशब्दकोश सर्वथा अन्तर्धानं जातः। तस्य अन्वेषणस्य आशा नास्ति। अस्य पुस्तकस्य द्वौ पाठौ स्तः -विस्तृतः संक्षिप्तः च।

"शुकसप्ततिः"इत्यस्मिन् ग्रन्थे पति विदेशगमनानन्तरं एकःशुकः गृहवधूं कथां कथयित्वा अन्यपुरुषाणां प्रति आकर्षणं निवारयति। कथायाः प्रारम्भे प्रायः प्रतिदिनं यदा मदनसेनस्य पत्नी प्रभावती शृङ्गारं कृत्वा अन्यान् पुरुषान् प्रति गन्तुमिच्छति तदा वुद्धिमानः शुकः दुष्टकर्माणि अनुमोदयति एवं च कथयति -"भवतः जीवनं सुखदं कर्तुम् । अतः यत्किमपि करोषि। त्वं सम्यक् करोषि, परन्तु यदि त्वमपि (प्रत्येककथायां पात्रस्य नाम गृहीत्वा वदति)चतुरगुणवत्ता इव वर्तसे । एतत् श्रुत्वा प्रभावत्याः जिज्ञासा वर्धतेसा शुकाय इत्यस्मै कथां कथयितुं याचते। शुकः अपि कथां कथयति। यदा कथा पराकाष्ठां अप्राप्नोत् तदा सः निवृत्य अपृच्छत् - इदानीं किं कर्तव्यम् । प्रभावती अपि अचिन्तयत्, संकेतस्थानं गन्तुं विस्मरन् अधिकांश रात्रौ अगच्छत्। ततः शुकः कथायाः अवशिष्टं भागं अकथयत्। एवं प्रकारेण ६९ रात्रयः अगच्छन्,७०तमे रात्रौ तस्याः पतिः आगच्छत्।

शुकसप्ततिःइत्यस्मिन् अधिकांशः कथाः गणिकावृत्ताधारिताः सन्ति। अधिकांशकथासु सुन्दराः स्त्रियः कथं पतिं वञ्चयन्ति।स्वजारं मिलितुं गच्छन्ति, कथं जारेण सह गृहीताः सन्तः धर्मस्य आडम्बरेण युक्तिं कृत्वा पतिं मुर्खं कृत्वा आत्मनः रक्षणं कुर्वन्ति, एतादृशाः काचन कथाः अपि सन्ति यत्र स्त्रियः जारेण गृहीताः सति ते न स्वसतीत्वं तारयितुं न च स्वस्य रक्षणं कर्तु शक्नुवन्ति। अपि तु तद्विपरीतं ताडिताः अपमानिताः च भवन्ति एवं च सर्वविधं स्त्रीणां धूर्तता अत्र वर्णिता।कथा-अश्लीलतायाः आधारेण ग्रन्थोऽयं उत्कृष्टं इति न शङ्कयेत् । एतादृशानि स्थानानि मानवजीवनस्य वास्तविकतायाः तीव्रभावनायाः अभिव्यक्तिः। अस्मिन् विषये विन्तर्निस्त्सः इत्यस्य मतं यत् 'ज्वार-सौजन्य"कथाः प्रायशः वेश्यावृत्तिकथायां परिवर्तितं। तेषु केचन प्रत्यक्षतया अश्लीलाः।

शुकसप्ततिकथा"इत्यस्य विस्तृत पाठस्य रचयिता चिन्तामणि भट्टः। हेमचन्द्रः शुकसप्ततिः"इत्यस्य उल्लेखः कृतः। पुनः १४शताब्द्यां ग्रन्थस्य फारसीभाषायां "तुतिनामह(तुतिनामा) इति नाम्ना अनुवादः अभवत्।

संस्कृतलोककथापरम्परायां 'भट्टरकद्वात्रिंशिका' इति पाठः अपि प्राप्यते। यः सम्भवतः मूलरूपेण संस्कृते नासीत्। परन्तु पश्चात् संस्कृते अनुवादः अभवत्।भट्टारकः एकः याचकः अत्र मुर्खानां दुष्टानां च कथाः सन्ति, ब्राह्मणानां पुरोहितानां च उपहासाः वर्तन्ते। तथैव शिवदासस्य 'कथार्नवः' अपि तत्रैव अस्ति। अत्र प्राकृतपद्येन लिखितं हरिभद्रस्य धूर्ताख्यानम् ग्रन्थः प्राप्यते। तथा च विद्यापतेः गद्येन लिखितम् 'पुरुषपरीक्षा' इति यत्र ४४ कथाः सन्ति।

सिंहासनद्वात्रिंशिका-

'सिंहासनद्वात्रिंशिका' एका मनोरञ्जनात्मकः लोकप्रियः कथासंग्रहः। द्वात्रिंशत्पुत्तलिका विक्रमचरितं च यस्य नाम। तस्य लेखकस्य सृष्टिकालस्य विषये च किमपि वक्तुम् कठिनम्। परन्तु तत्र राजाभोजस्य (१०१७-१०६३) स्पष्टोल्लेखात् भोजस्य अनन्तरं रचितः इति भासते। अस्य पुस्तकस्य लोकप्रियता सिद्धं भवति यत् ग्रन्थस्य पाण्डुलिप्याः अपि वहुसंख्यकाः सन्ति,येषुमध्ये वहवः विविधता सन्ति। अस्य कथाः उत्तरदक्षिणयोः मध्ये प्राप्यन्ते।

सिंहासनद्वात्रिंशिका इत्यस्य विभिन्नेषु पाण्डुलिपिषु वहवः भेदाः यद्यपि विक्रमादित्यस्य जीवनं तेषु सर्वेषु न्यूनाधिकं वा अन्तर्भवति। तथापि रामायणे तस्य कथाविषयानुसारं एकदा राजाविक्रमः इन्द्रस्य सभायां प्रादुर्भवति। इन्द्रः तस्मै ३२ प्रतिमाभिः सह निर्मीतं अपूर्वं सिंहासनमुपहाररूपेण दत्तवान्। विक्रमादित्यः राजसिंहासनमानयत् । पश्चात् शालिवाहनराजेन सह युद्धे विक्रमादित्यः मृतः। तस्य आदेशेन तत् सिंहासनं पृथिव्याः अधः निहितम् । परन्तु तत्र उपविष्टुं योग्यः राजानासीत्। अनेकवर्षेभ्यः अनन्तरं धारामहाराजः उज्जयिनी नगरस्य वर्हिः स्थितस्य स्वराजधन्याः क्षेत्रेषु तत् सिंहासनं प्राप्तवान्। तस्य स्तम्भषहस्रमासीत्। सिंहासनं भूमौ निष्कास्य राजधानीमानयत्।राजा तस्मिन् उपविष्टुम् आरब्धमात्रेण तस्मिन् निहिताः प्रत्येकाः प्रतिमाः विक्रमादित्यस्य वीरजीवनस्य कथां कथितवत्यः। एवं धारानरेशं च पृष्टवत्यः यत् सः अस्मिन् सिंहासने उपविष्टुं

योग्यः आसीत् वा। एवं प्रकारेण क्रमशः ३२प्रतिमाः शापकारणात् मूर्तिरूपेण परिणताः ताः सर्वाः इश्वरपत्नयः आसन्। ताः सर्वाः राज्ञा भोजेन सह मिलित्वा शापात् मुक्त्वा स्वर्गं गतवत्यः।

पुरुषपरीक्षा-

पुरुषपरीक्षा विश्वस्य अत्यधिकं जनप्रियं कथाग्रन्थम् । यस्य रचयिता विद्यापति। वयं सर्वे विद्यापतिं मैथिलीकोकिलः अभिनवजयदेवः च इति नाम्ना जानीमः। विद्यापतिः मिथिलाराजाशिवसिंहस्य आदेशानुसारं कुमाराणां नैतिकशिक्षणाय पुराङ्गनानां च मनोरञ्जनाय च पुरुषपरीक्षा कथाग्रन्थं रचितवान्।पुरुषपरीक्षायां चतुस्चत्वारिंशत् कथाः सन्ति। पुरुषपरीक्षायां कथानकं यथा -राजकुमारी विवाहयोग्या। योग्यं पात्रं राजा अन्वेषितवान्।तदा राज्यसभायां कश्चन ब्राह्मणः राजानं बुद्धिपूर्वकं पृष्टवान् यत् राजकुमार्याः कृते पुरुषं पात्रं अन्वेषयति वा इति।राजा ब्राह्मणवचनस्य अर्थं न अवगत्य। पात्रः पुरुषं भविष्यति किं प्रश्नं एतत्?ब्राह्मणः उवाच लोके वहवः पुरुषाः सन्ति।न तु पुच्छं इव पौरुषं पुरुषाणां अभावः परन्तु न तु पुरुषः इति वक्तुं शक्यते यदि सः पुंस्त्रूपरस्ति।पुरुषोचित गुणानामाधारेण यथार्थः पुरुषः भवितुमर्हति। अस्य कारणात् पुरुषपरीक्षा आवश्यकी भवति। मनुष्याणां पुण्यदोषाणां परीक्षा कठिनशीलायाम् एव कर्तव्यं भवति। अस्य आधारेण विद्यापतिः ततः विविधानि शुभाशुभपुरुषपात्राणि कथयति।दाता , दयालुः, योद्धा, श्रद्धावान्, परोपकारः इत्यादयः विविधागुणाः पुरुषाणां योग्यः पुरुषं क्रियते।

उपसंहृति -

कथा' तस्याः विशालस्य जनसमूहस्य साहित्यं यत् आधुनिकभारतीयपाश्चात्यविद्वद्भिः असभ्यःग्रामीणाः, अशिक्षितःइत्यादिभिः शब्दैः सम्वोधितरस्ति। किन्तु वस्तुतः एतत् न भवति।लोककथा' लोकजीवनस्य सजीवा काव्यविधास्ति।

लोककथा' संस्कृतकथासाहित्यस्य एकः सशक्तः भागरस्ति। यस्य विषये उक्तमस्ति- कथा समाजस्य कमेरास्ति, यस्य चित्रं मार्मिक'।संस्कृतलोककथायाः मूलं लोकजीवनमस्ति। एतासु कथासु लोकजीवनस्य एतादृशाः वहवः परिचिताः पक्षाः प्रकाशिताः। येषां वास्तविकं स्वरूपं न अस्माभिः ज्ञातम् । कथासरित्सागरस्य विषये पञ्जरः लिखितवान् यत् -तत्कालीनः कश्मीरस्य इतिहासः असन्तुष्टिः -निराशा-रक्तपातेन परिपूर्णरस्ति। एतासु दुःखदः-अन्धकार परिस्थितौ एव सोमदेवः कथासरित्सागरं रचितवान्।लोककथासु यदा धनसम्पन्ने 'सुवर्णप्लेट'इत्यत्र षट् पञ्चाशत्प्रकारस्य व्यञ्जनानि सेवितुं खादितुं च उच्चवर्गजीवनस्य वर्णनं भवति। निराश्रयान् अन्नं च व्यतीतवान् । मूर्खः -चोर-द्युत-धूर्तजन-वेश्या-चतुर-दुष्ट-पाखण्डी-रङ्गि-पुरुष-भिक्षु-अशुभ-उच्च-नीच-धनी-दरिद्र-धर्म-दुष्टादिभिः सम्वन्धाः कथाः समाजस्य।एकतः स्त्रियाः चपलस्वभावसम्वन्धाः कथाः प्रचुराः।अपरतः उच्चवर्गीयराजानां ,सामन्तानाम्, आर्याणां च जीवनस्य विलासः ऐश्वर्यं सौन्दर्यं च सम्वन्धाः कथाः सन्ति।

संस्कृतलोककथासु एकं विशेषं द्रष्टव्यं यत् अधिकांशं लोककथाः लोकजीवनेन सह प्रत्यक्षतया सम्वन्धाः न सन्ति। एतेषां कथानां मुख्यपात्राः राजानः, सामन्ताः धनिकः वर्गः वा सन्ति। प्रसंगवशं केषुचित् स्थानेषु 'लोककथा' इत्यनेन सह प्रत्यक्ष सम्वद्धाः कथाः अपि प्राप्यन्ते। यद्यपि कलानां विषयः उच्चवर्गजीवनेन सह सम्वन्धः अस्ति। तथापि लोकजीवनस्य चित्रमपि तेषु स्पष्टतया प्रतिबिम्बितं दृश्यते। परन्तु जनानां आदर्शः राजा अन्ये वा उच्चवर्गीयजनाः एव अभवन्।लोककथायाः 'लोक' इत्यनेन सह प्रत्यक्षतया सम्वन्धाः स्यात्। यतोहि लोकः सर्वदा वेदनाभिः विघ्नैः च सम्वन्धाः। जनाः स्वस्यकष्टानि, दुःखानि उत्पीडनानि च विस्मर्तुं काल्पनिक लोक-परीकथासु श्रुतवन्ति ।उच्चवर्गस्य सामान्यजनस्य च सम्बन्धः अपि एतेषु कथासु दृश्यते।अतिवृष्टिः,अनावृष्टिःआदि प्राकृतिक आपदानां कालेषु तस्य का स्थितिः आसीत्, कथं शोषणस्य शिकारः अभवत्, उच्चवर्गः कथं पारम्परिक-जीवनस्य, प्रत्ययानां च उपयोगेन स्वस्य स्वार्थं-पूर्तिं कृतवान्। तेषां सर्वेषाम् उल्लेखः अत्र प्राप्यते। निर्दोषः सामान्यजनः दैवकर्मणि विश्वसति।

कथासु प्रेमस्य वर्णनं सर्वथा स्वाभाविकमस्ति। क्वचित् भ्रातृ-भगिनीयोः शुद्धप्रेमः क्वचित् मातरं प्रति पुत्रपुत्री अकृत्रिमप्रेमः। कथं माता स्वप्राणात् अधिकं प्रियपुत्रं प्रति स्नेहं करोति।पति-पत्नीयोः प्रेमःपशुपक्षीयोः मध्ये प्रेमः इत्यादयः विषयाः सन्ति। कथासरित्सागरे वहवः कामप्रेमकथाः प्राप्यन्ते। एताः प्रवृत्तयः स्त्रीपुरुषेषु समानरूपेण दृश्यन्ते। कश्चित् अपि कामदेवात् पलायितुं न समर्थः- मनुष्याः, देवाः,पशवः,पक्षिणःच।

कथा लोकजीवनस्य जीवन्तं पवित्रं च प्रतिविम्वमस्ति। कथासु जनसामाजिकवातावरणे पारिवारिकसम्वन्धाः प्रेम्णः, स्त्रियः स्वाधीनता ,नैतिकता, शिक्षा, रीतिरिवाज, सामाजिकदोषाः च इति उल्लेखः। धार्मिकवातावरणविषये श्री मती सावित्री वशिष्ठा अलिखत् - जनजीवनं पूर्णतया धर्माधारितमस्ति। सार्वजनिकजीवनस्य आचरणं जीवनदर्शनं च धर्मानुरूपमस्ति। संस्कृतकथासाहित्ये लोकजीवन-पूजा-पार्वण-उपवास-संस्कार-श्रद्धा-कुलजीवन-आचार-विचार-शिक्षानीति-प्रेम-स्त्रियः आजीविका साधनानि-आर्थिकदशा-मुद्रा शोषणं-प्राकृतिक-आपदाःतस्मिन् स्थितिः,राज्ञः जनानां मध्ये परस्परं सम्वन्धः। नित्यकर्म इत्यादयः समग्रपक्षस्य प्रतिबिम्बं व्यक्तमस्ति। समाजस्य सर्वेषां वर्गाणां जीवनशैल्याः ज्ञात्वा अन्य जनाः सम्यक् जीवितुं शक्नुवन्ति।

अन्त्यटिप्पणी -

१. लोकसाहित्य की भूमिका पृ.९

२. लोकसाहित्य की निमर्ष पृ.४१

३. संस्कृतसाहित्य में नीतिकथा का उद्गमः एवं विकास पृ.१२०

४. हरियाणाप्रदेश का लोक साहित्य पृ.३३९

५. अग्निपुराण ३३७/१२

६. साहित्यदर्पण पृ.५२६

७. संस्कृत का इतिहास पृ.४२९

८. अष्टाध्यायी- ३/३/१०५

९. अष्टाध्यायी- ४/१/४

१०. मनुसंहिता- ३/२३१

११. हलायुधकोश- पृ.१९७(रामायण -१/८/६)

१२. हलायुधकोश-पृ.१९७(रघुवंश-८/४३)

१३. अभिज्ञानशकुन्तलम् (३/१)

१४. अभिज्ञानशकुन्तलम् (४/१)

१५. हलायुधकोश पृ.१९७

१६. अग्निपुराण- ३३७/१५-१६

१७. रूद्रटालंकारः/काव्यालंकारः -२०-२३

१८. भामहालंकारः १/२८-३०

१९. Wikipedia

२०. वांला कथासाहित्य जिज्ञासा पृ.३३

२१. वांला छोटोगल्प मनने-दर्पणे पृ.३

२२. वांला छोटोगल्प मनने-दर्पणे पृ.६

२३. Wikipedia

२४. जनपद,वर्ष-१,अंक१०,पृ.६९

२५-२६ कथासाहित्य वा गल्पसाहित्य पृ.१६८

२७. लोकसाहित्य की अवधारणा पृ.२३

२८. कथासाहित्य वा गल्पसाहित्य पृ.१७०

सन्दर्भसूची -

- झा,सूजन,'अमरकोश'Google App, Dictionary शब्दकल्पद्रुम-वाचस्पत्यम्वीलियम-आप्टे, डिक्शनरी संहिता), राष्ट्रीय संस्कृत संस्थान, मुम्बई।
- आस्ते,विमान शिवराम,'The Students English Sanskrit Dictionary '-दिल्ली, तृतीयसंस्करण२०१४
- रायः, अलोकः--साहित्यकोश कथासाहित् साहित्यलोक, कोलकाता, द्वितीयसंस्करण,१९९३.
- बन्दोपाध्यायधीरेन्द्रनाथ,'संस्कृत साहित्येर इतिहास '-पश्चिमबङ्ग राज्यपुस्तक पर्षत् , कोलकाता,२०१५
- मुखोपाध्यायअरूण कुमार,'वांला कथा साहित्य जिज्ञासा,दे'ज पावलिशिं, कलकाता, द्वितीयसंस्करण,२०१६
- चौधुरीशितल,वांलाछोटोगल्पःमनने दर्पणे '-प्रज्ञा विकासः, कोलकाता, द्वितीयप्रकाश,पुनर् मुद्रणं,२०१७
- अग्निपुराणम् व्यासदेवस्य -सम्पापञ्चानन तर्करत्न, कलकाता,नवभारत पावलिशार्स, कलकाता, द्वितीयसंस्करण, बङ्गाब्द१४१९
- अभिज्ञानशाकुन्तलम् कालिदासस्य -सम्पा.सत्यनारायण चक्रवर्ती,संस्कृत पुस्तक भाण्डार, कलकाता,२०१२
- काव्यार्दशः दण्डिनः -सम्पा.रङ्गाचार्य शास्त्री,भाण्डारकार ओरियेण्टल रिसर्च इनस्टिट्युट, पुणे,१९३८
- शुक्ल,रामदेव,काव्यालंकारः भामहस्य विद्याभवन संस्कृत ग्रन्थमाला,काशी१९६६
- शास्त्री,हरगविन्द,काव्यालंकारसूत्रवृत्तिः वामनस्य,चौखाम्वा सुरभारती प्रकाशन, वाराणसी,२०१०
- मुखोपाध्याय,सतीशचन्द्र,मनुसंहितामनोःवसुमतीसाहित्यमन्दिर, कलकाता,बङ्गाब्द१३३६
- मुखोपाध्यायविमलाकान्त साहित्यदर्पणः विश्वनाथकविराजस्य, संस्कृत पुस्तक भाण्डार,कलकाता१९३८
- चक्रवर्तीअलका हर्षचरितम् वाणभट्टस्य पञ्चमोच्छवासः, संस्कृत पुस्तक भाण्डार कलकाता,२००२
- कुरुश्रेष्ठ,रुचिः,'विसवी शताब्दी का संस्कृतलघुकथासाहित्य'-राष्टीय संस्कृत संस्थान, नवदेहली, प्रथमसंस्करण, कालस्योल्लेख नास्ति।
- शर्मा, गोपालः,संस्कृत लोककथा में लोकजीवन,हंसा प्रकाशन (५७,नाटाणी भवनमिश्रराजाजी का रास्ता चांदपोल बाजार, जयपुर -३०२००१)१९९९,८१-८६१२०-४१-६।

Citation: **Gole. P.,** (2026) "संस्कृतकथासाहित्यस्य महत्वमम्", *Bharati International Journal of Multidisciplinary Research & Development (BIJMRD)*, Vol-4, Issue-02, February-2026.